discriminatory power of separating chaff from corn, right from wrong and truth from falsehood. यथा संमिश्रिते नीरक्षीरे हीदं नीरमिदं क्षीरमिति पृथक्कर्तुं केऽपि पक्षिणो बिना हंसं न शक्नुवन्ति, तथा चेदं तथ्यमिदमतथ्यमिति ज्ञातुं विवेकज्ञं परमहंसं विना न कोऽपि शक्नोति पण्डित इति भावः। उक्तं च, क्षीरं ब्रह्म जगच्च नीरमुभयं तद्योगमभ्याहतं दुर्भेदं त्वितरेतरं चिरतरं सम्यग् विभक्तीकृतम्। येनाशेषविशेषदोषलहरीमासेदुषीं शेमुषीं सोऽयं शीलवतां पुनाति परमो हंसो द्विजात्यग्रणीः॥ लौ. न्याय.; नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत्। विश्वेऽस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः॥

**नृपनापितपुत्रन्यायः** The maxim of the king and barber's son. It is used to denote a man's innate fondness for his own possessions, however ugly or despicable in the eyes of others. ( यत्रातिनिन्द्येऽपि स्वकीयेऽतिरम्यताबुद्धिविवक्षा तत्रायमवतरतीति। ) It takes its origin from a story which states that a king on one occasion asked his barber to bring him the finest boy that he could see in his kingdom. The barber roamed for a long time over every part of the realm, but could discover no boy such as the king wanted. At last wearied and disappointed he returned home; and being charmed with the beauty of his own boy, who, to do him justice, was a personification of ugliness and deformity, went to the king and presented the boy to him. The king was at first very angry with the barber for having trifled with him, but on consideration excused him, as he ascribed the barber's preference of his own ugly boy to the dominant desire of human beings to consider their own possessions as supreme good. cf. सर्वः कान्तमात्मीयं पश्यति । Ś. 2.

**नो खल्वन्धाः सहस्रमपि पान्थाः पन्थानं विन्दन्ति** Not even a thousand blind travellers can discover the road (to be taken); न हि प्राधानिकान्यन्तर्बहिष्करणानि त्रयोदश सत्त्वप्रधानान्यपि स्वयमेवाचेतनानि तद्वृत्तयश्च स्वं वा परं वा वेदितुमुत्सहन्ते। नो खल्वन्धाः...विन्दन्ति। चक्षुष्मता चैकेन चेद् वेद्यते स एव तर्हि मार्गदर्शी स्वतन्त्रः कर्ता नेता तेषाम्। भामती 1. 1. 5.

**न्यग्रोधबीजन्यायः** The maxim of the fig-tree seed. It is used to denote that a seed, though small and subtle, sown in fertile land grows manifold. यथा न्यग्रोधबीजं स्तोकमपि सुक्षेत्र उप्तं सद् बहुविस्तीर्णतां याति, तथा प्रकृतेऽपि। लौ. न्याय.

**पङ्कप्रक्षालनन्यायः** The maxim of the washing off the mud. Just as it is more advisable for one to avoid getting into mud than to get into it and then wash it off, so it is more advisable for one to avoid getting into danger than to expose oneself to it and then try to get out of it somehow or other. cf. धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता। प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्। Pt. 1. 159; अग्निहोत्रादीनामपि पुण्यान्तरवद् विनाश्यत्वात् पङ्कक्षालनन्यायापातादारुरुक्षुणापि तानि नानुष्ठेयानि। Ś. B. on Br. Sūt. 4. 1. 16; "Prevention is better than cure."

**पङ्ग्वन्धन्यायः** The maxim of the lame man and the blind man. The conception is that of a lame man mounted on the shoulders of one who is blind, so that the former is furnished with the power of locomotion and the latter with sight. It is intended to illustrate mutual dependence for mutual advantage. पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः॥ Sāṁ. K. 21.

**पञ्जरचालनन्यायः** The maxim of the moving of the bird-cage. This furnishes an illustration of the power of united effort. ननु पञ्जरचालनन्यायेनैतद् भविष्यति। यथैकपञ्जरवर्तिन एकादशपक्षिणः प्रत्येकं प्रतिनियतव्यापाराः सन्तः संभूयैकं पञ्जरं चालयन्ति। एवमेकशरीरवर्तिन एकादशप्राणाः प्रत्येकं प्रतिनियतवृत्तयः सन्तः संभूयैकां प्राणाख्यां वृत्तिं प्रतिलप्स्यन्त इति। Ś. B. on Br. Sūt. 2. 4. 9.

**पञ्जरमुक्तपक्षिन्यायः** The simile of a bird let loose from its cage, used to illustrate the upward flight of the soul released from the body. बन्धमुक्तस्योर्ध्वगमनं दृष्टं यथा पञ्जरमुक्तशुकस्य यथा वा वारिनिर्भिन्नपरिणतैरण्डबीजस्य यथा वा दृढपङ्कलिप्तजलनिमज्जनप्रक्षीणपङ्कलेपशुष्कालाबूफलस्य। वेदान्तकल्पतरुपरिमल.

**पदातिन्यायः** The simile of a footman (in the game of Chess). It is used to suggest the crookedness of the wicked at the nick of the moment. बुद्धिबलापरपर्यायचतुरङ्गाख्यक्रीडने (the game of chess) पदाति (Mar. प्यादें)–ऋजुमार्गेण चलन् हननावसरे वक्रमार्गमुररीकरोति। अयं भावः। बुद्धिबलाख्यक्रीडने कल्पितौ राजमन्त्रिणौ सह चतुरङ्गबलेनान्योन्यं युध्यतः। तत्र तेषां गतिभेदोऽस्ति। पदातेस्तु ऋजुपथेन गमनम्, वक्रमार्गेण चाग्रस्थशत्रुहन्तृत्वमिति तद्विदो वदन्तीति। एवं दुर्जनाचारो ज्ञेयः। ऋजुना पथा चलन्नपि हनने वक्रां गतिं कलयन्। बुद्धिबलाख्यं क्रीडन् पदातिरिव दुर्जनो ज्ञेयः॥ लौ. न्याय.

**पदार्थानुसमयन्यायः** Vide Dictionary p. 960.

**पद्मपत्रस्थिततोयन्यायः** The maxim of water on the lotus leaf. It is used to illustrate two things: (1) All creation is sentient; (2) the company of the great yields the best reward. cf. लिप्यते न स पापेन पद्मपत्रमिवाम्भसि।; पद्मपत्रस्थितं तोयं धत्ते मुक्ताफलश्रियम्। महाजनस्य संपर्कः कस्य नोन्नतिकारकः॥; मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते। Bh. 2.

**पर्जन्यन्यायः** The simile of rain. cf. ईश्वरस्तु पर्जन्यवद् द्रष्टव्यः। Br. Sūt. 2. 3. 42; कृतकारि खल्वपि शास्त्रं पर्जन्यवत्। तद्यथा पर्जन्यो यावदूनं पूर्णं च सर्वमभिवर्षति Mbh. 1. 2. 9; 6. 1. 127. It rains everywhere without special favour or disfavour. Rain is equal and equitable to all. यथा पर्जन्यो बीजविशेषेषु रागं केषुचिद् द्वेषं चाकृत्वा उदासीनः सन् वर्षति, एवमीश्वरोऽपि पुण्यवत्सु रागं पापिषु द्वेषं चाकुर्वन् जगत् सृजति। नीलकण्ठ on Bg. 9. 9; पर्जन्य इव भूतानामाधारः पृथिवीपतिः। विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ॥ H. 1. 174.

**पश्यस्यद्रौ ज्वलदग्निं न पुनः पादयोरधः** (हेमचन्द्र) You see the fire burning on the mountain, but not that which is under your feet. "Why beholdest thou the mote that is in thy brother's eye, but perceivest not the beam that is in thine own eyes" cf. Marāṭhi proverbs "आपल्या पायाखाली काय जळते तें पाहावें!"; "दुसऱ्याच्या